# संस्कृत-वार्ता:

**दिनाङ्क :-21.06.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री योगदिवस:**

दशमम् अन्तराष्ट्रिय-योगदिवस: सम्पूर्णे विश्वे परिपाल्यते। प्रमुखकार्यक्रम: जम्मूकश्मीरस्य श्रीनगरस्य शेर-कश्मीर-अन्ताराष्ट्रिय-सम्मेलनकेन्द्रे आयोजयिष्यते। प्रधानमन्त्री नरेन्द्रमोदी श्रीनगरत: अस्य कार्यक्रमस्य नेतृत्वं विधास्यति। आहत्य सप्तसहस्रं जना: प्रधानमन्त्रिणा सह डलजलाशय तटे एकत्रिता: भविष्यन्ति। प्रधानमन्त्रिणा: नेतृत्वयुते एतस्मिन् कार्यक्रमे जम्मूकश्मीरस्य उपराज्यपाल: मनोजसिन्हा: केन्द्रीयमन्त्री प्रतापराव गणपतरावजाधव: अन्येच गणमान्या: जना: उपस्थिता: भविष्यन्ति। अस्य वर्षस्य योगदिवसस्य शीर्षको वर्तते-स्वस्मै समाजाय च योग: इति अस्य कार्यक्रमस्योद्देश्यं योगाभ्यासद्वारा वैश्विक-स्वास्थ्य-कल्याणं च संवर्धयितुं सहस्राधिकं प्रतिभागिनां एकत्रीकरणं विद्यते। कार्यक्रमावधौ प्रधानमन्त्री जनसभागमपि सम्बोधयिष्यति। अपिच सामान्ययोगमपि सम्बोधयिष्यति। अपिच सामान्ययोगसत्रे भागं स्वीकरिष्यति यस्मिन् शारीरिक-मानसिक-आध्यात्मिकविकासस्य प्रतिपोषणे योगमहत्वं उद्घाटयिष्यते। प्रधानमंत्री नरेन्द्र-मोदी जम्मूकश्मीरस्य द्विदिवसीययात्रायां अस्ति। श्रीमोदी पञ्चशताधिकैकसहस्रकोटि-रूप्यकाणां चतुरशीति: प्रमुखासां विकासपरियोजनानां शिलान्यासं उद्घाटनं कृतवान्।

-

**बांग्लादेश-प्रधानमन्त्रीयात्रा**

बांग्लादेशीया प्रधानमन्त्री शेख-हसीना-इत्येषा अद्यारभ्य भारतस्य द्विदिवसीय-यात्रां प्रति आयाति। स्व-यात्रावधौ प्रधानमन्त्रिणा नरेन्द्र मोदिना सह द्विपक्षीयविचारविमशान् अतिरिच्य सा राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया उपराष्ट्रपतिना जगदीपधनखडेन च सह मेलनं करिष्यति। विदेशमन्त्रिणा एस. जयशंकरेण सह तस्या: पारस्परिकोपवेशनं सुनिश्चितं अस्ति।

**राष्ट्रपति:-लोकसभाध्यक्ष:**

राष्ट्रपतिः द्रौपदीमुर्मू: लोकसभाध्यक्षस्य निर्वाचनपर्यन्तं अध्यक्षस्य कर्तव्यं निर्वोढुं, भाजपा-दलस्य लोकसभा-सदस्यं भर्तृहरि महताबं अस्थायि-लोकसभाध्यक्षरूपेण नियुक्तवती। सामाजिक-संचारमाध्यमे संसदीयकार्यमन्त्री किरेन रिजिजू: अवदत् यत्, राष्ट्रपतिः लोकसभायाः सदस्यान् सुरेश कोडिकुन्निल्, टी. आर्. बालु राधा मोहन् सिङ्घ्, फग्गन् सिङ्घ् कुलस्ते, सुदीप बन्दोपाध्याय इत्येतान् अपि नियुक्तवती येन ते अष्टादश तमाया: लोकसभायाः नवनिर्वाचितानां सदस्यानां कृते अध्यक्षस्य निर्वाचनपर्यन्तं शपथग्रहणस्य समर्थनस्य च कार्ये अस्थायि-अध्यक्षस्य साहाय्यं कुर्वन्ति।

**मुम्बई**

अष्टादशतम: मुम्बई-अन्ताराष्ट्रिय चलचित्र महोत्सव: अद्य सायंकाले अवसीयते। अस्मिन् वर्षे एकषष्टि: भाषासु नवपंचाशद्देशानां चतुर्दशाधिक त्रिशतं चलचित्राणि सप्तदिवसीस्य अस्य कार्यक्रमस्य अन्तर्गतं प्रदार्शितानि।

**यूजीसीनेटपरीक्षा**

विश्वविद्यालयानुदानयोगस्य नेटपरीक्षां अवलम्ब्य केन्द्रीयान्वेषणाभिकरणेन अभियोग: पंजीकृत:। शिक्षाविभागस्य सचिवेन प्राप्ताभिशङ्काया: आधारे अज्ञात-अपराधिन: विरूध्य भारतीयदण्डसंहिताया: अनुच्छेदस्य विंशत्यधिकैकशतं "ब" इत्यस्यान्तर्गतं विषया: समंकिता: अवधेयं वर्तते यत् राष्ट्रीय-परीक्षाभिकरण द्वारा अस्य मासस्य अष्टादशदिनांके देशस्य विभिन्नेषु भागेषु व्यावर्तकद्वये परीक्षा: समायोजिता:।

**क्रिकेट**

पुरूषाणां विंशति: प्रति विंशति क्रिकेट-विश्व चषकप्रतिस्पर्धायाम् बारबाडोसदेशस्य केनिंग्सटनओवन क्रीडांगणे भारतीयदलेन अफगानिस्तान दलं सप्त चत्वारिंशत् धावनांकै: पराजितम्।

**।। ति वार्ता:।।**